# संस्कृतवार्ताः

**दिनाङ्कः-12.08.2026**

**प्रातः - 06:55**

**'हर घर तिरङ्गा' अभियान**

अशीतितमस्य स्वतन्त्रता-दिवसस्य प्रसङ्गे कृत्से हि देशे 'हर घर तिरङ्गा' अभियानं गतिं भजते, यत् अगस्तमासस्य सप्तदश-दिनाङ्कं यावत् अनुवर्तिष्यते। अस्मिन्नेव वर्षे 'वन्दे मातरम्' गीतस्य सार्धैकशत तमी जयन्ती-पूर्तिः अपि उत्साहं द्विगुणीकरोति। प्रधानमन्त्रिणा नरेन्द्र-मोदिना सर्वेभ्यः देशवासिभ्यः विकसित-भारतस्य सङ्कल्पेन सह गृहेषु ध्वजम् उत्तोलयितुम् सादरम् उक्तम्।

**राष्ट्रपति-द्रौपदी-मुर्मुः**

राष्ट्रपति-द्रौपदी-मुर्मुः 'राष्ट्रीय-गौरव-अपमान-निरोधक (संशोधन) विधेयक-२०२६' इत्यस्मै स्वकीयाम् अनुमतिं दत्तवती। अनेन संशोधनेन राष्ट्र-गीतं 'वन्दे मातरम्' इत्येतत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानं वैधानिक-संरक्षणं लभते। अधुना अस्य गायने बाधोत्पादनम् अथवा सभायाः विघटनं विधिक-दृष्ट्या दण्डनीयः अपराधो भविष्यति।

**संसदा- अधिकरण-परिष्कार-विधेयकं**

संसदा 'अधिकरण-परिष्कार-विधेयकं, २०२६' पारितम्। राज्यसभया विधेयकस्यास्यानुमोदनमङ्गीकृतम्, यत् लोकसभया पूर्वमेव पारितम् आसीत्। विधि-न्याय-राज्यमन्त्री अर्जुन-राम-मेघवालः एतत् विधेयकं उपस्थापितवान्। अस्य विधेयकस्य मुख्यम् उद्देश्यं तावत् विविधाधिकरणानां अध्यक्षानां सदस्यानाञ्च अर्हतासु, नियुक्तौ, सेवा-नियमेषु तथा अधिकरणानां प्रशासने कार्य-प्रणाल्याञ्च दक्षताम्, स्वायत्तताम्, पारदर्शिताम्, एकरूपताञ्च आनेतुम् अस्ति। चर्चायाः प्रत्युत्तरे सती मेघवालेन उक्तं यत् प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे सर्वकारेण पंचविंशत्यधिकद्विसहस्र तमे वर्षे अधिकरणानां युक्तीकरणस्य प्रक्रिया आरब्धा आसीत्। मन्त्रिणा प्रोक्तं यत् अस्मिन् नूतन-विधेयके 'राष्ट्रीय-अधिकरण-आयोगस्य' स्थापनायाः प्रावधानम् अस्ति, यस्य अध्यक्षता सर्वोच्च-न्यायालयस्य पूर्व-न्यायाधीशः उत उच्च-न्यायालयस्य पूर्व-मुख्य-न्यायाधीशः करिष्यति।

विधेयक-पारणात् परं सदने विशेष-उल्लेखानां विषयेभ्यः समयः कल्पितः, यस्मिन् विविध-सदस्यैः लोक-महत्त्वस्य विषयाः उत्थापिताः। कार्य-समाप्त्यनन्तरं पीठासीन-अधिकारिणा सदनस्य कार्याचरणं श्वः प्रातः एकादश-वादनं यावत् स्थगितम्।

**लोकसभा - 'केरल विधेयकं**

लोकसभया 'केरल (नाम-परिवर्तनं) विधेयकं पारितम्। अस्मिन् विधेयके संविधानस्य प्रथम-अनुसूच्यां राज्यस्य 'केरल' इति नाम परिवर्त्य 'केरलम्' इति कर्तुं प्रावधानम् अस्ति। अस्य विधेयकस्य विषये भाषमाणः गृह-राज्यमन्त्री नित्यानन्द-रायः अवदत् यत् गतवर्षे केरल-विधानसभया राज्यस्य नाम 'केरलम्' इति कर्तुं केन्द्र-सर्वकाराय अनुरोध-प्रस्तावः पारितः आसीत्। तेन उक्तं यत् मलयाळम्-भाषायां राज्यस्य नाम 'केरलम्' इति अस्ति, परं संविधाने एतत् 'केरल' इति लिखितम् आसीत्।

राज्यसभया 'राष्ट्रीय-सहकारिता-विकास-निगम (संशोधन) विधेयकं, अपि पारितम्। सहकारिता-राज्यमन्त्री मुरलीधर-मोहोल्- इत्यनेन उपस्थापितं विधेयकं निगमस्य गतिविधीन् औद्योगिक-पण्येषु अपि विस्तारयितुं अनुमतिं ददाति। उभे अपि विधेयके नीट्-विप्रतिपत्तिं अधिकृत्य विपक्षस्य कोलाहल-मध्ये चर्चां विनैव पारिते।

**ऋतु विज्ञान-विभाग**

भारतीय-ऋतु विज्ञान-विभागेन अद्य पूर्व-राजस्थान-ओडिशा-प्रभृति-प्रदेशेषु अति-वृष्टेः पूर्वाभासः प्रकटीकृतः। पञ्जाब-उत्तराखंड-गुजरात-क्षेत्रेषु अपि अति वृष्टिः सम्भाव्यते। आन्ध्र-झारखण्ड-कर्नाटक-प्रदेशेषु विद्युत्-पात-झञ्झावाताभ्यां सह अति-वृष्टिपरा संचेतना च प्रसरिता, यदा तु राष्ट्रिय-राजधान्यां देहल्यां सायं-काले मेधाच्छादनेन सह मन्द-वृष्टिः सम्भाविता अस्ति।